ORIGINAL RESEARCH PAPER

Sanskrit

KEY WORDS:

पञ्चतन्त्रे मित्रसम्प्राप्तौ सत्त्वगुणप्रधानव्यक्तित्वम् – एकमध्ययनम्

D.Hemalatha Research Scholar, Dept. of Sanskrit S.V.University, Tirupati

संस्कृतवाङ्मयपरिचयः –

संस्कृतभाषा देवभाषा कथ्यते। संस्कृतभषायामेव वेदाः, इतिहासाः, पुराणानि, उपनिषदः, काव्यानि इत्याद्यनेके ग्रन्थाः उल्लिखिताः आसन्। वेदाः प्रभुसम्मिताः, पुराणानि सुहृत्सम्मितानि, काव्यानि कान्तासम्मितानि इति कथयन्ति। संस्कृतभाषायाः रूपद्वयं विद्यते लौकिकं वैदिकञ्चेति। वेदाः, इतिहासाः, पुराणानि उपनिषदः वैदिकवाङ्मये अन्तर्भवन्ति। लौकिकवाङ्मये तु काव्यानि अन्तर्भवन्ति।

संस्कृतसाहित्ये काव्यस्य स्थानम् –

जगति सर्वत्र भारतीयानां विकासौन्नत्य, भारतीयसंस्कृतेः वैभवञ्च या प्रकरयामासः सा गीर्वाणी संस्कृतभाषा देवी वाक् इति प्रसिद्धा। अस्मिन् वाङ्मये बहूनि शास्त्राणि सन्ति तान्यथा – अल'ाशास्त्रं, काव्यशास्त्रं, धर्मशास्त्रं, दर्शनशास्त्रमित्यादीनि। एतेषु शास्त्रेषु काव्यशास्त्रम् अत्यन्तं महत्वपूर्णं विद्यते।

काव्येषु कथाकाव्यानां वैशिष्ट्यम्–

संस्कृते कथानां विषये अस्त्येकं विपुलं कथासाहित्यं यस्य न केवलं भारते अपि तु विदेशेऽपि प्रभावो अवलोक्यते। भारतवर्षस्य त्रिषु धार्मिकसम्प्रदायेषु कीऽख्यानयोरुपयोगः स्वसिद्धान्तप्रचाराय बहुशः कृतः। वैदिकसाहित्यस्य ब्राह्मणेषु उपनिषत्सु च प्राग्राख्यानां सं'तः ऋग्वेदस्य संवादसूक्तेषु मिलत्येव। जैन साहित्ये प्राकृत संस्कृतापभ्रंशभाषासु कथानां विस्तरः समुपलभ्यते। बौद्धेषु पालिभाषायां निबद्धाः कथाः जातक नाम्ना विख्याताः।

भारतीयसाहित्ये प्राचीनकाले कथायाः पचक्रद्धयमुपलभ्ये–१.बृहत्कथा, २.पञ्चतन्त्रञ्च। अनयोः बृहत्कथा प्राचीना। पैशाची भाषायामुपनिबद्धा बृहत्कथा सम्प्रति मूलरूपे नोपलभ्यते f कन्तु संस्कृते निबद्धं पञ्चतन्त्रमद्यापि तस्यामेव भाषायां सुरक्षितं वर्तते।

कथाकाव्येषु पञ्चतन्त्रम् –

पञ्चतन्त्रग्रन्थे प्रस्तुताः कथाः भारतदेशे नितान्तं प्राचीनाः प्रसिद्धाश्च। अस्य ग्रन्थस्य अत्यन्तप्राचीनसंस्करणं ङ्गतन्त्राख्यिका' इति नाम्ना प्रसिद्धमासीत्। पञ्चतन्त्रे पञ्चतन्त्राणि भवन्ति तान्यथा – मित्रभेदः, मित्रसम्प्राप्तिः, सन्धिविग्रहः, लब्धप्रणाशः, अपरीक्षितकारत्वञ्च।

प्रत्येकस्मिन् तन्त्रे मुख्यकथा एका एव भवति परन्तु तस्याङ्गतया कथापुष्ट्यर्थम् अनेकाः गौणकथाः वर्णिताः। ग्रन्थकर्ता तु विष्णुशर्मा एव। अस्य ग्रन्थकर्तुः मुख्योद्देश्यं तु आरम्भादारभ्य सदाचारस्य तथैव नीत्युपदेशः एव। दक्षिणप्रान्तस्य महिलारोप्य नामक राजस्य अमरकीर्तेः मूर्खपुत्राः विद्याविहीनाः आसन्। तेभ्यः निपुणता प्रदानायैव विष्णुशर्मणा पञ्चतन्त्रमिति नीत्युपदेशक्ग्रन्थम् रचितवान्।

लघुपतनकः –

मित्रसम्प्राप्तौ बहूनि सत्त्वगुण सम्पन्नानि पात्राणि वर्तन्ते। प्रथमं लघुपतनकः एव जन्मना काकोऽपि उत्तमगुण सम्पन्नः वर्णितः। अनेन कुलं वर्णः जातिर्वा न व्यक्तित्वविकासे कारणम् किन्तु गुणसम्पत्तिरेव व्यक्तित्वविकासहेतुरिति स्पष्टमवगम्यते।

आगच्छन्तं व्याधं दृष्ट्वैव लघुपतनकः अनिष्टं शं'तवान्। यद्यसौ मनुष्यसामान्यः इव प्रवर्तते तदा नाऽहम् एतान् तण्डुलकणान् खादामि न एतेभ्यः स्पृहयामि इति वा कृतनिश्चयः केवलम् आत्मरक्षार्थमेव यतते। अपि च काकत्वात् पैरः अभक्ष्यः पालनपक्षि–रूपेणापि शुक्कपोतादिवत् न आदरणीयः इति आत्मरक्षा तस्य सिद्धैव। तथापि सः तथा न कृतवान्। स्वयं सुरक्षितोऽपि परक्षणे यत्नं कृतवान्। अस्मिन् काले सर्वे मनुष्याः स्वार्थपरायणाः आगामिनीं परेषाम् आपदं दृष्ट्वापि तान् न वारयन्ति आपद्गतान् रक्षितं च यत्नं न कुर्वन्ति। यदि सर्वोऽपि मनुष्यः तथा कृतयत्नः संघस्य उपकारको भवतीति लघुपतनकः ज्ञापयति। लघुपतनकस्य वृत्तानुसरणेन सर्वस्यापि परोपकाररूपं व्यक्तित्वं विकसितं भवेदिति निश्चप्रचम्। दूरात् आगतं व्याधं दृष्ट्वा लघुपतनकः स्वयम् एवं चिन्तयित्वा परानपि ततो वरयामास। वृक्षस्याः सर्वेपक्षिणः तेन वारिताःच।

ङ्गस कदाचित् प्राणयात्रार्थं पुरमुद्दिश्य प्रचलितो यावत् पश्यति तावत् जालहस्तोऽतिकृष्णतनुः स्फुटितचरण ऊर्ध्वकेशो यमकिंकराकारो नरः समुखो बभूव। अथ तद् दृष्ट्वा शंकितमना व्यचिन्तयत्। 'यदयं दुरात्माऽद्य ममाश्रयवट पादप सम्मुखोऽभ्येति। तन्न ज्ञायते किमद्य वटवासिनां विहंगमानां संक्षयो भविष्यति न वा'। एवं बहुविधं विचिन्त्य तत् क्षणान्निवृत्य तमेव वटपादपं गत्वा सर्वान् विहंगमान् प्रोवाच। भोः। अयं दुरात्मा लुब्धको जालतण्डुलहस्तः समभ्येति तत् सर्वथा तस्य न विश्वसनीयम्। एष जालं प्रसार्य तण्डुलान् प्रेक्षेप्स्यति। ते तण्डलाः भवद्भिः सर्वैरपि कालकूटसदृशा द्रष्टव्याः'। इति। एतेषु लघुपतनकवाक्येषु 'अभयं सत्त्वसंशुद्धिः'' इति दैवीसम्पदपि स्पष्टमुपदिष्टम्। अपि च अलोलुपत्वं ज्ञान सूचकमपि तत्र दर्शितम्। स्वयम् अप्रवृत्तौ एवं लघुपतनकः सात्त्विकः। परेषां पक्षिणां वारणेन 'दया सर्वभूतेषु', अनायासः अकार्पण्यम् इति त्रयः सात्त्विकानां गुणाश्च सूचिताः। यदा लघुपतनकः वटवासिनां पक्षिणां क्षेमम् आलोचितवान् तदेव तस्य सत्त्वगुणः अभिव्यक्तः। एवं सर्वोऽपि मनुष्यः स्वार्थं विहाय परक्षेयं वाञ्छति सः उन्नतः उत्तमोत्तमश्च व्यक्तिः भवति। आत्मा सुरक्षितोऽपि परेषां रक्षां चिन्तयति लघुपतनकवत् सोऽपि सत्वगुणसम्पन्नः व्यक्तिः भवति। अत्र लघुपतनके अलोलुपत्वम्, क्षमा, दया दूरदर्शित्वमिति सत्त्वगुणानुकूलाः व्यक्तित्वविकास हेतवः गुणाः वर्णिताः।

यदा चित्रग्रीवः तण्डुलान् भोक्तुं सपरिवारः कृतयत्नः तदापि लघुपतनकः सपरिवारं तं आशायाः वारितवान्। न केवलम् आत्मीयानां नूतनानामपि विषये दया कार्या इति लघुपतनकः स्ववर्तनेन सूचितवान्।

चित्रग्रीववचनानन्तरं हिरण्यकेन मैत्रीमिच्छन्नपि लघुपतनकः स्वसत्वगुणसम्पन्नत्वं सूचितवान्। हिरण्यके विश्वासे चलप्रकृतौ अकार्येऽपि मित्रत्वे तं मित्रं कर्तुं कृतनिश्चयः। हिरण्यकोऽपि ज्ञानी, नीतिज्ञः प्रथमं मैत्रीं नाङ्गीकृतवान्। तदानीं लघुपतनकवाक्येषु व्यक्तित्वविकासहेतवः बहवो श्लोकाः उपदिष्टाः। दुर्जनः मृत् घटः इव सुखवेद्यः पुनः सन्धातुम् अशक्यः। सज्जनः सुवर्णमिव दुर्भेद्यः सुखसन्धेयश्च भवति। यदि मैत्री करणे एवं गुणपरीक्षा क्रियते तथा मैत्री व्यक्तित्वविकासायकल्पते इति लघुपतनकः सूचितवान्।

मृद्घट इव सुखभेद्यो दुःसंधानश्च दुर्जनो भवति।
सुजनस्तु कनकघट इव दुर्भेद्यः सुकरसन्धिश्च॥[२]
इक्षोर्ग्रात् क्रमशः पर्वणि पर्वणि यथा रस विशेषः।
तद्वत् सज्जनमैत्री विपरीतानां तु विपरीता॥[३]
आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी परा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम्॥[४]

दानं च सर्वेषां प्रीत्युपादककारणं सर्वान् मित्राणि करोतीति लघुपतनक मैत्र्या कविः सूचितवान्। द्वेष्योऽपि मित्रं भवतीति दानमहत्त्वं प्रतिपादितवान्। दानं च सत्त्वगुणेषु मुख्यं भवति। यथा शक्ति मित्रेभ्योऽपि वा दत्वा प्रीतिकरो भवेदिति लघुपतनकपात्रेण कविः सूचयति।

तावत् प्रीतिः भवेल्लोके यावद्दानं प्रदीयते।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम्॥[५]
पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकम्।
यत्प्रभावादपि द्वेषी मित्रतां याति तत्क्षणात्॥[६]
पुत्रादपि प्रियतरं खलु तेन दानं
मन्ये पशोरपि विवेकविवर्जितस्य।
दत्ते खलु तु निखिलं खलु येन दुग्धं
नित्यं ददाति महिषी ससुतापि पश्य॥[७]

अपि च लघुपतनकः धैर्यसम्पन्नः। आपदि समुत्पन्नायां यः निर्वेदम् अप्राप्य आपत् तरणोपायं चिन्तयति सः आत्मानं रक्षितुं प्रभवति। 'अनिर्वेदः श्रियः मूलम्' इति व्यक्तित्वविकासहेतुं गुणं दुर्भिक्षे देशान्तरं जिगमिषुः लघुपतनकः अस्मान् उपदिशति। यदा स्वदेशे वृत्तिः न लब्धा तदा देशान्तरं गत्वापि आत्मरक्षां कुर्यात्। यदा च आत्मा रक्षितव्यः तदा स्थिरनिवासमपि त्यजेदिति लघुपतनकः स्ववृत्त्या सूचयति। स्वदेशः इति अभिमानं कृत्वा तत्रैव प्राणान् न त्यजेदिति मन्थरकं द्रष्टुमिच्छतः लघुपतनक वाक्येषु स्पष्टम

।

अनावृष्टिहते देशे शस्ये च प्रलयं गते।
धान्यास्तात न पश्यन्ति देशभङ्ग कुलक्षयम्॥[८]
कोऽतिभारः समर्थानां? किं दूरं व्यवसायिनाम्।

को विदेशः सविद्यानां? कः परः प्रियवादिनाम्।।[९]

सर्वैः मानवैः एवं विधा वृत्तिः अनुष्ठेया एव।

लघुपतनकः विवेकी। आपदि यस्य बुद्धिः न क्षीयते स एव उत्तमो व्यक्तिः भवितुमर्हति। प्रायशः बुद्धिबलं बलान्तराणि अतीत्य आपत्काले सहायकं भवति। आपदि देवाः एव प्राणिनः रक्षणार्थं योग्यां बुद्धिं दास्यन्तीति विदुषां मतम्।

न देवा दण्डमादाय रक्षन्ति पशुपालवत्।
यं तु रक्षितुमिच्छन्ति बुध्या संयोजयन्ति तम्।।

लघुपतनकस्य बुद्धिः सदा हितमेव पश्यति। उपायं च चिन्तयति। तादृशी बुद्धिरेव व्यक्तित्व विकासाय कल्पते। हिरण्यकः धननाशेन विषण्णः। मन्थरकः योग्यः धननाशं नष्टं कार्यं वा न शोचतीति हिरण्यकम् आश्वासयामास। तदानीं हिरण्यकः मन्थरवचनं समर्थयन् प्रमाणं निरूपयितुम् आर्षं वचनमाह–

सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः।।[१०]
अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह।
त एव सुहृदः प्रोक्ता अन्ये स्युः नाम धारकाः।।[११]

'हितं मनोहारि च दुर्लभं वचः' अतः हितवादिनः प्रियवादिनः कदापि न भवन्ति। 'सुलभाः पुरुषाः राजन्' इति श्लोकः श्रीमद्रामायणे दृश्यते। ज्ञातरामशक्तिः मारीचः सीता अपहरणोद्यतं रावणं स्वयं तथा न कर्तव्यमिति हितम् उपदिदेश। रावणः मारीचवाक्यं न श्रुतवान्। ततो नष्टः। मन्थरकः हितमेव वक्ति तत् श्रोतव्यमिति लघुपतनकवाक्ये सत्त्वगुणाधिक्यं स्पष्टं प्रतीयते। अन्योऽपि केवलं पथ्यं वाक्यं वदन् श्रुण्वन् वा उत्तमं व्यक्तित्वं लभते।

अपि च लघुपतनकः बुद्धिमान्। प्राप्तायामपदि सपदि आपत्कारणं चिन्तयति। प्रथमं यदा चित्राङ्गः तदा प्रविष्टः तदा भीताः सर्वे स्वस्थानं प्रविष्टाः। लघुपतनकः एक एव भयकारणं अन्विष्टवान्। मृगमात्रकृतं तत् शब्दं ज्ञात्वा इतरेषां भयमपि अपनीतवान्। अतः समुपस्थितायां आपदि बुद्धिः प्रथमम् उपयोज्या। विवादीनि बलान्तराणि न प्रयोजकानि।

विद्याभिजन मित्राणि बुद्धिसत्त्वधनानि च।
तपः सहायवीर्याणि दैवं च दशमं बलम्।।

लघुपतनकः तथा बुद्धिमान्यः आपत्कारणं ज्ञातवान्। सर्वोऽपि तथाकृत्वा आपदः आत्मानं रक्षितुं प्रभवति। यदा चित्राङ्गः वागुरायां बद्धः तदा मन्थरकोऽपि तत्रागतः। तदानीं लघुपतनकः एव आगामिनीं मन्थरग्रहण निश्चयात्मिकाम् आपदं ज्ञातवान्। तथैव मन्थरकः व्याधेन नीतः। तदापि लघुपतनकः एव सर्वेषां मोचने उपायं चिन्तितवान्।

अतीतलाभस्य सुरक्षणार्थं
भविष्यलाभस्य च सङ्गमार्थम्।
आपत्प्रपन्नस्य च मोक्षणार्थं
यन्मन्यतेऽसौ परमो हि मन्त्रः।।[१२]

तत् श्रुत्वा वायस आह–'भोः यद्येवं तत् क्रियतां मद्वचः। एष चित्राङ्गोऽस्य मार्गे गत्वा किञ्चित्पल्वलमासाद्य तस्य तीरे निश्चेतनो भूत्वा पततु। अहमप्यस्य शिरसि समारुह्य मन्दैश्चञ्चुप्रहारैः शिरं उल्लेखयिष्यामि येनासौ दुष्टलुब्धकोऽमुं मृतं मत्वा मम चञ्चुप्रहरणप्रयत्नेन मन्थरकं भूमौ क्षिप्त्वा मृगार्थं परिधाविष्यति। अत्रान्तरे त्वया दर्भमयानि पाशानि खण्डनीयानि येनासौ मन्थरको द्रुततरं पल्वलं प्रविशति। इति।

अतः व्यक्तित्वविकास इच्छुः कदापि बुद्धिबलं न त्यजेत्। बुध्या समयानुकूलः मन्त्रः लघुपतनकेन चिन्तितः। अतः सर्वे मुक्ताः।

एवं लघुपतनकः बुद्धिसम्पन्नः व्यक्तित्वविकासे हेतूनां मार्गदर्शकः वर्तते। तानि च व्यक्तित्वविकास कारणानि लघुपतनकात् ग्राह्याणि एवं बोद्धव्यानि।

१. आशया यदि प्रमादः भविष्यतीति चिन्तामात्रमपि भवति तदा तद् वस्तूनि अभिलाषः न कार्यः।
२. ये च उत्तमगुणसम्पन्नाः तैः सह मैत्री महता यत्नेनापि सम्पादनीया।
३. यत्र वृत्तेः नाशः जीविते संशयो वा भवति तदा तत् स्थानम् त्याज्यम्।
४. आपदि धैर्यं न त्याज्यम्, उपायश्च चिन्तनीयः।

टिप्पणी

१. भगवद्गीता, अ.१६, श्लो.१
२. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.३८
३. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.३९
४. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.४०
५. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.५३
६. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.५४
७. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.५५
८. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.५७
९. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.५८
१०. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.१६९
११. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.१७०
१२. पञ्चतन्त्रम्–मित्रसन्देहः,श्लोक.१९६